# ॥ रासक्रीडा १ ॥

.. rAsakrIDA 1 ..

sanskritdocuments.org

August 2, 2016

# .. rAsakrIDA 1 ..

## ॥ रासक्रीडा १ ॥

Document Information

Text title : rAsakrIDA 1 from Gargasamhita
File name : rAsakrIDA1gargasamhitA.itx
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Vishwas Bhide vrbhide at rediffmail.com
Proofread by : Vishwas Bhide, PSA Easwaran psaeaswaran at gmail.com
Description-comments : gargasamhitA
Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/
Latest update : February 3, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ रासक्रीडा १ ॥

श्रीगर्ग उवाच -
हेमन्ते मासि पूर्वस्मिन् राकायां राधिकेश्वरः ।
वंशीं वशकरीं दध्मौ यथा वृन्दावने पुरा ॥ १॥

ध्वनिर्बभूव तस्याश्च सर्वेषामाहरन्मनः ।
निशम्य गोप्यः सङ्क्विन्नाः कामखेदेन तत्रसुः ॥ २॥

रुन्धन्नम्बुभृतश्चमत्कृतिपरं कुर्वन्मुहुस्त्वम्बरं
ध्यानाद्धन्त नयन्सनन्दनमुखान्विस्मेरयन्वेधसम् ।
औत्सुक्याद्बलिभिर्बलिं चटुलयन्भोगेन्द्रमाघूर्णयन्
भिन्दन्नण्डकटाहभित्तिमभितो बभ्राम वंशीध्वनिः ॥ ३॥

अथोदगाच्चन्द्रमास्तु चर्षणीनां शुचो मृजन् ।
यथा प्रियाया राजेन्द्र विदेशादागतः प्रियः ॥ ४॥

तदैव यमुना राजंस्तनुं दिव्यं दधार ह ।
वृन्दावनं गिरीन्द्रञ्च व्रजभूमिञ्च मानद ॥ ५॥

कृष्णा नदी जयति यत्र मणीन्द्रमुक्ता-
    माणिक्यशुभ्रहरिता करतोलिकाभिः ।
वैदूर्यनीलकहरिद्धरिवज्रपीत-
    सोपानमण्डपयुताभिरतिस्फुरन्ती ॥ ६॥

स्वच्छन्दसूत्पतितमत्स्यगणैर्वहन्ती
    सच्छ्यामलेन वपुषाघगणं हरन्ती ।
उत्तुङ्गलोललहरी कमलैर्लसन्ती
    कृष्णा नदी जयति कृष्णगृहे लुठन्ती ॥ ७॥

गोवर्धनं भज गिरीं शतचन्द्रयुक्तं
    मन्दारचन्दनलतावृतकल्पवृक्षम् ।
श्रीरासमण्डलयुतं मणिमण्डपाढ्यं
    कोटीरमञ्जुलनिकुञ्जकुटीरकोटिम् ॥ ८॥

वृन्दावनं च यमुनातटनीरतीर-
    सम्पृक्तमन्दगमनैरतिगन्धवातैः ।
तत्कम्पितं च सुरभीकृतसर्वदेशं
    श्रीखण्डकुङ्कुममृदागुरुचर्चितं तम् ॥ ९॥

जुष्टं वसन्तनवपल्लवपुष्परङ्गै-

मन्दारचन्दनसुचम्पकनीपनिम्बैः ।
आम्रातकाम्रपनसागुरुनागरङ्गैः
श्रीतालपिप्पलवटैर्नवनारिकेलैः ॥ १०॥

खर्जूरश्रीफललवङ्गविराजमान-
मञ्जीरशालकतमालकदम्बयुक्तम् ।
सन्तानकुन्दबदरीकदलीसिताढ्यं
श्रीशाल्मलीबकुलकेतकिसच्छिरीषम् ॥ ११॥

सन्मोदिनीजलजवृन्दमनोहराभं
वृन्दारकं वरवनं तुलसीलताढ्यम् ।
श्रीमल्लिकामृतलतामधुमाधवीभिः
संराजितं स्मर नृपेन्द्र व्रजस्य मध्ये ॥ १२॥

वंशीवटं च कलकण्ठविहंङ्गमैश्च
कृष्णातटे च पुलिनं किल बालुकाढ्यम् ।
श्रीपाटलैर्मधुककिंशुकसत्प्रियालै-
रौदुम्बरैः क्रमुकद्राक्षकपित्थयुक्तम् ॥ १३॥

श्रीकोविदारपिचुमन्दलतार्जुनैश्च
प्लक्षैरशोकसरलैः सुरदारुभिश्च ।
जम्बूसुवेत्रनलकुब्जकस्वर्णयूथी-
पुन्नागनागकुटजैः कुरबैर्वृतं च ॥ १४॥

चक्राह्वसारसशुकैः सितराजहंसैः ।
कारण्डवैश्च जलकुक्कुटकूजितं च ॥ १५॥

दात्यूहकोकिलकपोतकनीलकण्ठै- ।
नृत्यन्मयूरकलराववृतं स्मर त्वम् ॥ १६॥

श्यामाचकोरकलखञ्जनसारिकाभिः
पारावतैर्भ्रमरतित्तिरतित्तिरीभिः ।
श्रीकाञ्चनीमधुलतामधुयूथिकाभिः
संवेष्टितं हरिणमर्कटमर्कटीभिः ॥ १७॥

श्रीपद्मरागशिखरं च निकुञ्जगेहं
श्रीकौस्तुभेन्द्रमणिराजिविराजमानम् ।
कोटीन्दुमण्डलवितानगणैश्च हैमैः
श्रीपट्टसूत्ररचितैर्मणितोरणाढ्यम् ॥ १८॥

मुक्तावृतैः कनकपीतपतत्पताकैः

पारावतैः सितपतत्रिभिरावृतञ्च ।
मन्दारकुन्दकरवीरकयूथिकानां
मालाविचित्ररचितं नवचम्पकानाम् ॥ १९॥

नागेशपद्महरिचन्दनपल्लवानां
श्रीमालतीकुरबकाञ्चनयूथिकानाम् ।
मालाभिरावृतमनङ्गहरं गृहं त-
त्सद्रत्नदर्पणवृतं सितचामरैश्च ॥ २०॥

सिंहासनैश्च नवपल्लवपुष्पयुक्तैः
शय्यासनैः कनकविद्रुमपादवृन्दैः ।
श्रीचन्दनागुरुजलैर्मकरन्दसङ्घैः
कस्तूरिकामुदितकुङ्कुमचर्चितं तत् ॥ २१॥

एजद्वसन्ततरुपल्लवमेव वातैः
शीतैर्गजेन्द्रगमनैः सुरभीकृताङ्गम् ।
एतादृशं हरिनिकुञ्जगृहं स्मर त्वं
सन्नम्रशाखतरुयुक्तमतीव पुष्पैः ॥ २२॥

श्रीवेणुगीतं बहुकामवर्द्धनं निशम्य सर्वा व्रजयोषितो नृप ।
श्रीकृष्णकान्तेन गृहीतमानसा विसृज्य कर्माणि समाययुर्वने ॥ २३॥

रुद्धा याः पतिभी राजन्कृष्णेन हृतमानसाः ।
स्थूलं शरीरं तास्त्यक्त्वा त्वरं कृष्णान्तिकं ययुः ॥ २४॥

सिंहासने हेमदुकूलसंयुते मध्ये स्थितं सुन्दरनन्दनन्दनम् ।
श्रीसुन्दरी राधिकया समं परं गले दधानं मधुमालतीस्रजम् ॥ २५॥

श्यामं प्रभातार्ककिरीटिनं हरिं स्फुरत्प्रभं श्रीमुरलीमनोहरम् ।
पीताम्बरं मन्मथराशिमोहनं व्रजस्त्रियस्तं ददृशुः समागताः ॥ २६॥

दृष्ट्वा प्रियाः प्रियतमं मत्स्यकुण्डलिनं हरिम् ।
गोप्यो मूर्च्छां गताः सद्यो भूप चालक्षितोद्यमाः ॥ २७॥

सान्त्वयामास ताः कृष्णो मिष्टवाक्यैः सुधासमैः ।
तदा गोप्यो वनोद्देशे सर्वाश्चैतन्यतां गताः ॥ २८॥

कृष्णं गद्गदया वाचा स्तुत्वा भीताः स्त्रियो वराः ।
त्यक्त्वा विरहजं दुःखं गोविन्दं ददृशुः प्रियम् ॥ २९॥

वृन्दावने भ्राजमाने मालतीवनसङ्कुले ।
दिव्यद्रुमलताजाले मधुपध्वनिनादिते ॥ ३०॥

विचचार हरिः साक्षाद्देवो मदनमोहनः ।
पद्माभं पद्महस्तेन गृहीत्वा राधिकाकरम् ॥ ३१॥

प्रहसन्भगवान्साक्षादाययौ यमुनातटम् ।
कृष्णातीरे निकुञ्जे वै श्रीकृष्णो निषसाद ह ॥ ३२॥

तस्मिन्गृहे मधुपतेः शृणु गोपिकानां
श्रीकृष्णचन्द्रचरणस्मरणावृतानाम् ।
झङ्कारनूपुरझणत्करकङ्कणानां
मञ्जीररत्नविचलत्कटिकिङ्किणीनाम् ॥ ३३॥

स्मेरद्युतिस्फुटचमत्कृतगण्डदेशैः
श्रीदन्तपङ्क्तिविलसत्तडितालिलेशैः ।
कोटीरहारहरिताङ्गदभूषितानां
बालार्कमण्डलविकुण्डलमण्डितानाम् ॥ ३४॥

तासां तु कापि युवती कथिता च मुग्धा
मध्यापि कापि तरुणी रुचिरा प्रगल्भा ।
काचित्तरुं विनयती मधुरं हसन्ती
काचित्सखी मदयुता सुवने व्रजन्ती ॥ ३५॥

सन्ताड्य तामपि करेण तु काप्यधाव-
त्सङ्गृह्य कापि भुवने कमलैर्जघान ।
काचिच्छ्लथत्कनकहारमुपाजहार
काचित्प्रमुक्तकबरी तु विहारमत्ता ॥ ३६॥

श्रीजाह्नवी च यमुना मधु माधवी च
शीला रमा शशिमुखी विरजा सुशीला ।
चन्द्रानना च ललिता त्वचला विशाखा
मायाल्प एव कथिता भवने त्वसङ्ख्याः ॥ ३७॥

लीलातपत्रमतिमौक्तिकदामजालं
नीत्वा चलन्ति मणिभूमिषु तत्र काश्चित् ।
श्रीचामरव्यजनदण्डधरा वयस्याः
काश्चिद्व्रजन्ति धृतपीतपतत्पताकाः ॥ ३८॥

नृत्यन्ति तत्र हरिवेषधरास्तु काश्चि-
द्वीणाकरा मधुरतालमृदङ्गहस्ताः ।
वंशीधराश्च वृषभानुसुताः सुवेषाः
केयुरकुण्डलयुता मणिवेत्रहस्ताः ॥ ३९॥

सद्भावभावरसतालयुतस्मिताक्तै-

झंकारनूपुरयुतैर्विशदैः कटाक्षैः ।
सङ्गीतनृत्यविदितैर्भ्रुकुटीविभङ्गैः
राधां हरिं च सततं परितोषयन्त्यः ॥ ४०॥

तस्मिन्निकुञ्जभवने यमुनातटेऽपि
वंशीवटे वनधरानिकटे हरिं तम् ।
श्रीराधया च गिरिराजतटं व्रजन्तं
नन्दात्मजं च नटवेषधरं स्मर त्वम् ॥ ४१॥

श्रीपद्मरागनखदीप्तिपदारविन्दं
झङ्कारनूपुरधरं स्फुरदङ्गदेशम् ।
कुर्वन्तमेव तु पदारुणभूमिदेशं
श्रीमत्परागसुरुचालमितस्ततस्तु ॥ ४२॥

लक्ष्मीकराब्जपरिलालितजानुदेशं
रम्भोरु पीतवसनं तु कृशोदराभम् ।
रोमावलिभ्रमरनाभिसरस्त्रिरेखं
काञ्चीधरं भृगुपदं मणीकौस्तुभाढ्यम् ॥ ४३॥

श्रीवत्सहाररुचिरं नवमेघनीलं
पीताम्बरं करिकरस्फुटबाहुदण्डम् ।
रत्नाङ्गदं च मणिकङ्कणपद्महस्तं
श्रीराजहंसवरकन्धरशोभमानम् ॥ ४४॥

श्रीकम्बुकण्ठललितं विलसत्कपोलं
मध्यं तु निम्नचिबुकं किल कुन्ददन्तम् ।
बिम्बाधरं स्मितलसच्छुकचञ्चुनासं
पीयूषकल्पवचनं प्रचलत्कटाक्षम् ॥ ४५॥

श्रीपुण्डरीकदलनेत्रमनङ्गलीलं
भ्रूमण्डलस्मितगुणावृतकामचापम् ।
विद्युच्छटोच्छलितरत्नकिरीटकोटिं
मार्तण्डमण्डलविकुण्डलमण्डिताभम् ॥ ४६॥

वंशीधरं त्वहिविलोलगुडालकाढ्यं
राधापतिं सजलपद्ममुखं चलन्तम् ।
कन्दर्पकोटिघनमानहरं कृशाङ्गं
वंशीवटे नटवरं भज सर्वथा त्वम् ॥ ४७॥

आरक्तरक्तनखचन्द्रपदाब्जशोभां
मञ्जीरनूपुररणत्कटिकिङ्किणीकाम् ।

श्रीघण्टिकाकनककङ्कणशब्दमुक्तां
    राधां दधामि तरुपुञ्जनिकुञ्जमध्ये ॥ ४८॥

नीलाम्बरैः कनकरश्मितटस्फुरद्भिः
    श्रीभानुजातटमरुद्गतिचञ्चलाङ्गैः ।
सूक्ष्मस्वरूपललितैरतिगौरवर्णां
    रासेश्वरीं भज मनोहरमन्दहासाम् ॥ ४९॥

बालार्कमण्डलमहाङ्गदरत्नहारां
    ताटङ्कतोरणमणीन्द्रमनोहराभाम् ।
श्रीकण्ठभालसुमनोनवपञ्चदाम्नीं
    रत्नाङ्गुलीयललितां व्रजराजपत्नीम् ॥ ५०॥

चूडामणिद्युतिलसत्स्फुरदर्द्धचन्द्रां
    ग्रैवेयकालपनपत्रविचित्ररूपाम् ।
श्रीपट्टसूत्रमणीपट्टचलद्विदाम्नीं
    स्फूर्ज्जत्सहस्रदलपद्मधरां भजस्व ॥ ५१॥

श्रीबाहुकङ्कणलसत्कुचरत्नदीप्तिं
    श्रीनासिकाभरणभूषितगण्डदेशाम् ।
सद्यौवनालसगतिं कलसर्पवेणीं
    मध्येन्दुकोटिवदनां स्फुटचम्पकाभाम् ॥ ५२॥

सद्भावभावसहितां नवपद्मनेत्रां
    स्फूर्ज्जत्स्मितद्युतिकलां प्रचलत्कटाक्षाम् ।
कृष्णप्रियां ललितकुन्तलपुञ्जलाभां
    मन्दारहारमधुरभ्रमरीरवाढ्याम् ॥ ५३॥

श्रीखण्डकुङ्कुममृदागुरुवारिसिक्तां
    श्रीबिन्दुकीरुचिरपत्रविचित्रचित्राम् ।
सन्तानपत्ररुचिरामलमञ्जनाभां
    रासेश्वरीं गजगतिं भज पद्मिनीं ताम् ॥ ५४॥

एतादृशीं रतिवरां तु समेत्य कृष्णो
    गच्छन्निकुञ्जवनजालविलोकानाय ।
धावन्ति तत्र मणिछत्रधराश्च गोप्यो
    नीत्वा तथा चमरचारुपतत्पताकाः ॥ ५५॥

षड्रागमेव वरधैवतमध्यमाद्यै-
    र्गायन्तमादिपुरुषं भज नन्दपुत्रम् ।
षट्त्रिंशतस्तदनुवर्त्तितरागिणीनां

वंशीवरेण ललितेन वरं व्रजन्तम् ॥ ५६॥

श‍ृङ्गारवीरकरुणाद्भुतहास्यरौद्र-
बीभत्सशान्तकभयानकनित्ययुक्तम् ।
भक्तप्रियं व्रजवधूमुखपद्मभृङ्गं
योगीन्द्रहृत्कमलविस्फुरदङ्घ्रियुग्मम् ॥ ५७॥

क्षेत्रज्ञमादिपुरुषं स्वधियज्ञरूपं
सर्वेश्वरं सकलकारणकारणेशम् ।
कृष्णं हरिं प्रकृतिपूरषयोः पुमांसं
सर्वं निरस्तकपटं निजतेजसेह ॥ ५८॥

यं वै स्तुवन्ति शिवधर्मसुरेशशेष-
लोकेशसिद्धिदगणेशसुरादयोऽपि ।
राधारमाप्रकृतिभूविरजास्वराद्या
वेदा भजन्ति सततं तमहं भजामि ॥ ५९॥

इति गर्गसंहितायां अश्वमेधखण्डे द्विचत्वारिंशोऽध्यायः रासक्रीडा समाप्ता ।

Garga Samhita, Ashvamedhakhanda, Adhaya 42
Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.n
Proofread by PSA Easwaran psaeaswaran at gmail.com

.. rAsakrIDA 1 ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com